# स्मृतिपरम्परायां तीर्थयात्रा

**प्रो. भगवती सुदेश**

## सारः

तीर्थयात्रा तीर्थस्थानञ्च भारतीयपरम्परायाः सर्वाधिकः महत्त्वपूर्णः आयामः। तीर्थयात्रा जनान् सद्गुणानां नैतिकतायाश्च दिशि अभिप्रेरयतीति भारतीयसंस्कृतेः मूर्धन्यं वैशिष्ट्यम्। तीर्थयात्रायाः अन्याऽपि समुचिता बहुमान्या अवधारणा या शारीरिकरूपेण पवित्रतायाः नैतिकशुद्धेश्च उद्देश्येन कस्यचित् पवित्रस्थानस्य यात्रया संबद्धा वर्तते, यस्याः संपादनेन जनः पापेभ्यो मुच्यते। तीर्थेषु मोक्षदायिनी शक्तिः भवति या न केवलं मानवेभ्यः पशुपक्षिकीटादिभ्यश्चापि स्वर्गं मोक्षं वा प्रददाति। शोधपत्रेऽस्मिन् स्मृतिपरम्परायां पुण्यस्थानेषु विहितायाः तीर्थयात्रायाः सम्प्रत्ययम् अवबोद्धुं प्रयतिष्यते।

## परिचयः

'तीर्थ'शब्दः 'तॄ' धातोः निष्पद्यते, यस्य अर्थो वर्तते कस्याश्चित् नद्याः पारगमनम्, उत नद्याः लंघनम् अथवा पारगमनम्। प्रेरणार्थे अयं धातुः रक्षणं, त्राणम्, अपि च मोचनं निरूपयति। मन्ये, शब्दोऽयं स्थानविशेषे दिव्यतायाः उपस्थितिमपि निर्दिशति। 'तॄ' - तरति पापादिकं यस्मात् अथवा अनेन इति तीर्थम्। तीर्थशब्दस्य नैके अर्था लभ्यन्ते- गङ्गा-यमुनाप्रभृतीनि पुण्योदकस्थानानि, आगमशास्त्रम्, ऋषीणाम् आश्रमाः, जलम्, गुरुः। ऋग्वेदे अन्यासु संहितासु च प्रयुक्तस्य 'तीर्थ'शब्दस्य अर्थो वर्तते मार्गः, पन्था उत क्वचिद् नदी अपि अभिप्रेता। तैत्तिरीयसंहितायां तीर्थे अर्थात् नद्याः पुण्योदके स्नानमेव यज्ञ उक्तः, यतः सर्वे देवाः उदके एव केन्द्रिताः भवन्ति। मन्ये तीर्थशब्दस्य आशयः तादृशेन स्थलेन वर्तते यत्र मुक्तिदायिनी दिव्या च शक्तिः व्याप्नोति। इत्थं तीर्थयात्रा नाम धार्मिकोद्देशेन उपक्रान्ता यात्रा उतवा धार्मिकयात्रा इति।

कालिदासविरचिते मालविकाग्निमित्रे नृत्यशिक्षकः गणदासः भणति- 'तीर्थादभिनयविद्या शिक्षिता'। उत्तररामचरिते रामः सीतायाः विषये वदति- 'तीर्थोदकञ्च वह्निश्च नान्यतः शुद्धिमर्हतः'। अत्र टीकाकारः 'तीर्थ'पदं गङ्गादीनामुदकम् इति व्याख्याति। यद्यपि तीर्थपदस्य बहवो अर्थाः लक्ष्यन्ते, परं पुण्योदकम् इत्यर्थः मुख्यरूपेण एतेन सम्बद्धः वर्तते। सुविदितमेव यत् जलं हि जीवनम्। अतः इदम् ईश्वरत्वेन पूज्यते। निखिलाः अपि नद्यः मानवतायाः कल्याणायैव प्रवहन्ति। मत्स्यपुराणे उच्यते यत् इमाः नद्यः विश्वस्य मातरः सन्ति। कुत्रचित् पर्वताः, आश्रमाः, भगवतः स्थानानि, भुवः कतिपयाः भागाश्चापि तीर्थस्थलानि अभिधीयन्ते।

सङ्क्षेपतः, यत्र कुत्रापि शुद्धिः, पावनता, नैसर्गिकसौन्दर्यम्, मनःशान्तिः, प्रसादश्च विद्यते तत् तीर्थस्थानमुच्यते। तत्स्थानं काचित् नदी, गङ्गोत्रीसदृशः नद्युद्गमः, प्रयागसदृशः नदीसङ्गमः, हिमालयः, विन्ध्याचलम् उत चित्रकूटसमः पर्वतः, वाल्मीकेः आश्रमः, अगस्त्याश्रमः, भरद्वाजाश्रमः इत्यादयः प्रमुखाः आश्रमाः। अतः तीर्थस्य अर्थः तत्स्थानम् उत जलयुक्तं स्थानं (नदी, प्रपातः, जलाशयप्रभृति) यत् तस्य विलक्षणस्वरूपत्वात् पुण्यार्जनस्य भावनां जागरयेत्। तदर्थं कस्या अपि आकस्मिकपरिस्थितेः (यथा शालिग्रामादेः सान्निध्यम्) अस्तित्वम् आवश्यकं नास्ति। अथवा तानि स्थलानि यानि बुधैः मुनिभिश्च तीर्थसञ्ज्ञया अभिहितानि। स्कन्दपुराणे उक्तम् यत्र पुराकालस्य सत्पुरुषाः पुण्यार्जनाय वसतिम् अकार्षुः, तानि स्थलानि तीर्थानि विद्यन्ते। तत्र प्रामुख्यं तु महापुरुषाणां सान्निध्यमेव, तीर्थयात्रायाः अनुष्ठानं तु गौणायते।

‘मुख्या पुरुषयात्रा हि तीर्थयात्रानुषङ्गतः।
सद्भिः समाश्रितो भूप भूमिभागस्तथोच्यते॥’

**तीर्थयात्रायाः अवधारणा**

कस्यापि पवित्रस्थलस्य सामूहिकरूपेण आचर्यमाणाः यात्राः तीर्थयात्राः उच्यन्ते। इयं यात्रा, वस्तुतः, तपश्चर्या वर्तते। अतः सामान्यतः विना वाहनं, विना सुखसाधनानि च पद्भ्याम् इयं यात्रा अनुष्ठीयते। तीर्थयात्रायाः स्वरूपम् अवधारणा च बहुषु ग्रन्थेषु उल्लेखमाप्नोति, यथा स्कन्दपुराणम्, स्थलपुराणम्, श्रीवेङ्कटाचलमाहत्म्यम्, महाभारतम्, ब्रह्मपुराणम्, मत्स्यपुराणं च। यथोक्तं स्थलपुराणे यत् पुराकाले ऋषिमुनयः एषु पुण्यस्थलेषु सविशेषं तपश्चर्यां भगवदाराधनं ध्यानम् अन्यान् आध्यात्मिकान् क्रियाकलापांश्च आचरन्ति स्म। अतः इमानि स्थलानि आध्यात्मिकशक्त्यादिभिः नियन्त्रितानि, यानि कस्यचित् दुष्प्रवृत्तीः निराकर्तुम् अर्हन्ति, अपि च मनुजं ज्ञानस्य भक्तेः आत्मसाक्षात्कारस्य च दिशि उन्मुखीकर्तुम् अर्हन्ति।

तीर्थयात्रा काचन आध्यात्मिकी अन्वेषणा मार्गदर्शिका शक्तिश्च वर्तते या दिव्यतां मानवताञ्च एकसूत्रे बध्नाति। अन्ततः, परिदृश्यस्य संपूर्णता तस्य पवित्रं प्रतीकात्मकञ्च भूगोलम् एवंविधम् ‘आस्थानकं’ सृजति यत् पुण्यं स्थानं, पुण्यं कालं, पुण्यम् अर्थं, पुण्यानि अनुष्ठानानि च व्याप्नोति, ब्रह्माण्डे मानवजातेः अस्मितायाः सिद्धेः प्रयासे प्रतीकात्मकानि मूर्तानि चोभयविधानि मानसतत्त्वानि गृह्णाति। तीर्थयात्राया अनुष्ठाने यात्रा, गतिविधयः, साहचर्यस्य अनुभवाश्च सम्मिलिताः सन्ति, येन तीर्थयात्रा स्वयमेव एवंविधम्

अनुष्ठानं जायते, यस्य रूपान्तरणात्मकं मूल्यं वर्तते। इदं मूल्यं अपूर्वः अलौकिकश्च कश्चन अनुभवः वर्तते। अमुमेव विचारम् आश्रित्य कश्चन तीर्थम् उपक्रमते। हिंदूभिः प्रयुज्यमानं 'तीर्थयात्रा'पदमेव अमुं गुणं द्योतयति। हिन्दुमान्यतानुसारम्, तीर्थयात्रायाः सम्पादनेन व्यक्तिः रूपान्तरितो भवति तथा अभिनवरूपेण जीवनं प्रारभते। वस्तुतः, तीर्थयात्रा भारतीयसंस्कृतेः प्रमुखं वैशिष्ट्यं या लोकान् सद्गुणानां नैतिकतायाश्च अभिप्रेरणां प्रयच्छति । तीर्थयात्रायाः सर्वमान्यः कश्चन दृष्टिकोणः वर्तते शारीरिक-मानसिक-नैतिकशुद्धिम् उद्दिश्य पुण्यस्थलस्य भौतिकी यात्रा यस्याः प्रतिफलं पापेभ्यः मुक्तिः वर्तते। उक्तं शास्त्रेषु- 'तीर्थेषु यत्कृतं पापं वज्रलेपो भविष्यति'। अर्थात् अपरत्र कृतं पापं तीर्थयात्रायाः आचरणेन नश्यति, परं तीर्थयात्रायां कृतं पापं न क्वापि कदापि नश्यति। अतः तीर्थयात्रायाः अवधौ सर्वदा परमात्मनो ध्यानं धर्मकार्यञ्च अनुष्ठेयम्, न जातुचित् तत्र धर्मेतराणि कार्याणि अनुष्ठेयानि।'

भारतवर्षे तीर्थयात्रायाः सुदीर्घः इतिहासो वर्तते। सूत्रेषु मनुयाज्ञवल्क्यादिषु स्मृतिषु च तीर्थेभ्यः काचित् महत्त्वपूर्णा स्थितिः न लक्ष्यते। किन्तु, महाभारते पुराणेषु च तेषां महिम्नः विशदं निरूपणं वर्तते, तानि यज्ञेभ्यः अतिशयानीति अभिमतम् अस्ति-

'ऋषीणां परमं गुह्यमिदं भरतसत्तम।
तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते॥' महा. वनपर्व ८२.१७

महाभारतं प्राचीनकाले तीर्थस्थलानां विषये सूचनायाः प्राचीनतमं सर्वाधिकं महत्त्वपूर्णञ्च स्रोतः वरीवर्ति।। तीर्थकेन्द्रितं कर्मकाण्डं प्रधानतः तदारभ्य प्रसिद्धिमवाप यदा पुराणानां प्रणयनं प्रारब्धम्। ब्रह्मपुराणानुसारं असंख्यानानि हि पुराणानि। पी.वी. काने स्थूलं किमपि अनुमानं प्रस्तौति। तदनुसारं प्रायेण मत्स्यपुराणे १२००, वराहपुराणे ३१८२, तदानीन्तने पद्मपुराणे ४०००, ब्रह्मपुराणे च ६७०० पद्यानि तीर्थमाश्रित्य प्रणीतानि सन्ति। स्कन्दपुराणं तु विशिष्टानां तीर्थानां माहात्म्यं वर्णयितुं विशिष्टं खण्डमेकं समर्प्य प्रारम्भिकमध्यकालस्य अन्ते तीर्थविषयक्के प्रणयने अतिवृद्धेः साक्ष्यं प्रददाति। तदनन्तरं तीर्थेषु मध्ययुगीनाः धर्मनिबन्धाः लक्ष्यन्ते- तीर्थविवेचनखण्डः, तीर्थचिन्तामणिः, त्रिस्थलीसेतुः, तीर्थप्रकाशः इत्यादयः अनेके ग्रन्थाः येषु पृथक् पृथक् तीर्थक्षेत्राणां महिमा वर्णितः - माहात्म्यानि स्थलपुराणानि च तीर्थानां विषये विशदं विवेचयन्ति। नवमशताब्द्यां शङ्कराचार्येण चतुर्षु प्रधानभूतेषु स्थलेषु चत्वारि मठानि प्रतिष्ठापतानि। एतेषां लोकप्रियता वृद्धिंगता यदा मध्यकाले शङ्करविजयग्रन्थाः प्रणयनमवापुः। मध्यकालस्य उत्तरार्धारम्भे प्रयाग-काशी-गयाख्यायाः त्रिस्थल्याः अवधारणा आविरभूत्। नारायणभट्टस्य 'त्रिस्थली'ग्रन्थः अमुष्मिन् विषये सर्वाधिकः प्रामाणिको ग्रन्थो मन्यते।

मध्ययुगीनकाले नैके निबन्धाः प्रबन्धाश्च प्रणीताः येषु विविधविधानां तीर्थस्थलानां माहात्म्यं नैकाभिः रीतिभिः वर्णितम्। वस्तुतः, पुराणेभ्यः उपयुक्तं विषयं चित्वा सटिप्पणं पुनर्व्यवस्थापनमेव एषां वर्णनानां लक्ष्म्, यद्यपि बहुत्र मूलस्रोतांसि विलुप्तप्रायाणि एव दृश्यन्ते। एतेषु आद्यो निबन्धः वर्तते लक्ष्मीधरस्य 'कृत्यकल्पतरुः', यत्र तीर्थविषयकः सकलः काण्डः 'तीर्थविवेचनकाण्ड'नाम्ना प्रसिद्धः। महत्त्वपूर्णेषु निबन्धान्तरेषु वाचस्पतिमिश्रस्य 'तीर्थचिन्तामणिः', नारायणभट्टस्य 'त्रिस्थलीसेतुः', मित्रमिश्रस्य च 'तीर्थप्रकाशः' उल्लेखार्हाः वर्तन्ते।

प्राचीनवाङ्मये तीर्थस्य अवधारणा न्यूनातिन्यूनम् अर्थचतुष्कं लक्षयति-

१. स्थानविशेषस्य मार्गः यत्र शक्तिः अवाप्तुं शक्यते। (ऋ.वे. १.१६९.६; १.१७३.११)

२. नद्याः तटः यत्र जनाः शुद्धिसंस्कारत्वेन जले निमज्जितुम् अर्हन्ति। (ऋ,वे. ८.४७.११; १.४६.८)

३. पवित्रस्थलम्, यत् आत्माभिव्यक्तेः शक्तिः धारयते।

४. दिव्यघटनानाम् अथ च देवविहितानां कार्यविशेषाणाम् आधारेण पूतानि स्थलानि। (श.ब्रा. १८.९)

अष्टमशताब्द्योः मध्यवर्तिकाले प्रणीते माहात्म्य-साहित्ये विवरणं प्राप्यते यत् कथं पथिकः यात्रां प्रतिष्ठते इति तत् आध्यात्मिकप्रगतेः प्रतीकभूतम्, कथं च तीर्थयात्रा पापेभ्यः अन्येभ्यः सांसारिकविषयेभ्यः च मुक्त्यै उपकरोति। इमानि विवरणानि आध्यात्मिकपरिवर्तनस्य नैकान् पक्षान् सूचयन्ति-

१. धार्मिककर्तव्यस्य आशयः सांसारिककार्येभ्यः मुक्तिः वर्तते।

२. यात्रायाः सिद्ध्यै देवस्य आश्रयो ग्राह्यः। तेन पथिकाःदिव्यात्मभिः घनिष्ठतया संगच्छन्ते ।

३, तीर्थयात्रिणः पुण्यप्रतीकानां सहायकतीर्थानां च दिव्यतायाः सम्बद्धदेवानां च ज्ञानं प्राप्नुयुः।

४. कठिनाः दुष्कराश्च यात्राः तपश्चर्यायाः रूपम्।

५. तीर्थयात्रा कश्चन अवसरः यत्र पथिकः कल्याणं, सद्भावनाम्, आनन्दञ्च समुन्नेतुं पृथिव्याः शक्तीनाम् अनुभवं कुर्यात्।

आधुनिककाले अपि धर्मानुस्यूता इयं परम्परा महता उत्साहेन महत्या स्फूर्त्या च समायोज्यते। 'तीर्थ'शब्दस्य सर्वसाधारणः अर्थः तीर्थस्थानम् उत पवित्रस्थानम्। तथापि

बहवो विषयाः तीर्थत्वेन ग्रहीतुं शक्यन्ते, यथा स्वीयः गुरुः, सन्तमहापुरुषः, अथवा करुणा-औदार्यादयो गुणाः अपि तीर्थपदवाच्याः भवन्ति। अनेन ज्ञायते यत् पावनत्वं केवलं स्थलविशेषेष्वेव न प्राप्यते, अस्मान् परितः सर्वत्र इदं प्राप्तुं शक्यते इति अस्माकं परम्परायाः दृढो विश्वासः। तथापि इदं तु उल्लेखनीयं यत् तीर्थयात्रायै व्यवहृते पारम्परिके पदे पवित्रस्थानस्यैव अवधारणा न, पथिकस्य यात्रायाः अपि अवधारणा निहिता वर्तते। अस्यायम् अभिप्रायः यत् यात्रा अस्य अनुष्ठानस्य अनिवार्यम् अङ्गम्। यया रीत्या च यात्रेयम् आचर्यते सा हि रूपन्तरणप्रक्रियायाः अङ्गं वर्तते। महाभारतं पुराणानि च संस्तुवन्ति यत् तीर्थयात्रा वैदिकयज्ञादीनामपेक्षया मितव्ययतया अतिसरलतया च अनुष्ठातुम् अर्हः धार्मिको विकल्पः वर्तते। इमे ग्रन्थाः प्रायेण अश्वमेधसदृशैः वैदिकयज्ञैः सह तुलनां विधाय तीर्थयात्राणां धार्मिकं माहात्म्यं विवृण्वन्ति। उक्तं त्रिस्थलीसेतौ- 'कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्' इत्यादिस्मृतिभिः धर्मस्य अवश्यकर्तव्यता प्रोक्ता। तत्र यज्ञादिधर्मस्य बहुधनादिसाध्यत्वेन तत्र असमर्थान् प्रति तीर्थयात्रा विहिता। वनपर्वणि देवयज्ञानां तीर्थयात्राणां च तुलना विहिता। यज्ञेषु विविधविधानि पात्राणि यन्त्राणि सम्भारसञ्चयनम्, पुरोहितानां सहकारः, धर्मपत्न्याः उपस्थितिश्चेत्यादेः अपेक्षा भवति। अतः तेषाम् अनुष्ठानं तु केवलं राजकुमारैः धनसम्पन्नैरेव सम्भाव्यते। अधनाः, विधुराः, निस्सहायाः, निर्मित्राः तु न तद् अनुष्ठातुम् अर्हन्ति। तीर्थयात्रया यानि पुण्यानि अर्ज्यन्ते, तानि पुरोहितेभ्यः समधिकां दक्षिणां प्रदाय सम्पादितैः अग्निष्टोमकल्पैः यज्ञैः अर्जितुं न शक्यन्ते।

उक्तं मात्स्ये भारते च-

'यो दरिद्रैरपि विधिः शक्या प्राप्तुं जनेश्वर।
तुल्यो यज्ञफलैः पुण्यैस्तं निबोध महीपते॥
ऋषीणां परमं गुह्यमिदं भरतसत्तम।
तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते॥
अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च।
अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते।।
अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः।
न तत्फलमवाप्नोति तीर्थाभिगमनेन तत्॥'

तथापि उभे अपि स्रोतसी बलं दत्तः यत् अनुशासिता जीवनपद्धतिः व्यक्तिगतगुणानाम् आधानं च तावदेव महत्त्वम् आधत्ते यावत् महत्त्वपूर्णं तत् स्थानम्। अनयोः प्रतिकूलयोः अवधारणयोः प्रत्येकमपि अतीव महत्त्वपूर्णं किमपि प्रतिपादयति- एकतः, स्थलस्य पावनत्वम्. अपरतः विशुद्धा निष्ठा प्रतिबद्धता चापि।

तीर्थयात्रया सम्पूर्णं पुण्यं प्राप्तुं महाभारतम् उच्चनैतिकाध्यात्मिकेषु गुणेषु बलं

प्रादात्। उक्तं तत्र यत् यस्य पाणिपादं मनश्च सुसंयतम्, यो विद्यावान् तपस्वान् कीर्तिमांश्च वर्तते, स एव तीर्थयात्रया सम्पूर्णं फलं प्राप्तुम् अर्हति। यः दानप्रतिग्रहात् उपावृत्तः, येन केनचित् सन्तुष्टः, अहंकारनिवृत्तश्च वर्तते स तीर्थफलं लभते। यो हि प्रवञ्चनारहितः, धनार्जनाय भिन्नभिन्नोद्योगेभ्यो निवृत्तः, लघ्वाहारः, जितेन्द्रियः, सर्वपापविमुक्तश्च विद्यते, पुनश्च अक्रोधी, सत्यनिष्ठः, दृढव्रतः, सर्वभूतेषु आत्मोपमश्च भवति, स एव तीर्थानां फलं विन्दते। अस्य अयमभिप्रायः, यः एतादृशगुणैः रहितः स तीर्थयात्रया पापानि नाशयितुं प्रभवति, किन्तु एतैः गुणविशेषैः संयुतो मनुजः समधिकं पुण्यं लभते। स्कन्दपुराणे उक्तं यत् शरीरस्य सिक्तत्वादेव कश्चन स्नात इति नाभिधीयते। यः इन्द्रियसंयमेन सिक्तः, पुनीतः, नानाविधदोषैः विमुक्तः, निष्कलङ्कश्च वर्तते स एव स्नात इत्युच्यते- 'स स्नातो यो दमस्नातः स बाह्याभ्यन्तरः शुचिः।' (अनु.प. १०८/९) विष्णुधर्मोत्तरपुराणे स्फुटं निरूपितम्-

'पापानां पापशमनं धर्मवृद्धिस्तथा सताम्।
विज्ञेयं सेवितं तीर्थं तस्मात्तीर्थपरो भवेत्॥
तीर्थं फलप्रदं ज्ञेयं नात्र कार्या विचारणा।' (वि.ध.पु. ३/२७३/७ एवं ९)

हिन्दुधर्मस्य सन्दर्भे 'तीर्थ'पदं तीर्थयात्रामेव सम्प्रत्याययितुं प्रयुज्यते। तीर्थयात्रायाः वाच्यार्थस्तु नदीतटानां यात्रायाः उपक्रमो वर्तते। तृ"धातोः निष्पन्नः तीर्थशब्दः नद्याः पारगमनं उत जलयात्रां वा अभिप्रैति। जैकोबसनमहोदयः भणति यत् तीर्थस्य अर्थो भवति तत् स्थानं भवितुमर्हति यत्र मुक्तिप्रदा दिव्या च शक्तिः उपलभ्यते। अतः तार्थयात्रा एतादृशी भौतिकयात्रा अवगन्तुं शक्यते यां कश्चन पथिकः पूर्वोक्तदृशा उपक्रामते। परं सम्प्रत्ययोऽयं संकीर्णः, यतः अयं खलु भौतिकयात्रामात्रेण संबद्धा। यथा अगेहानन्दभारती प्रतिपादयति यत् तीर्थं तीर्थयात्रा च उभे पदे लाक्षणिकरूपेण अवगम्येते। स सविस्तरं तर्कयति- 'तीर्थयात्रा लाक्षणिकदृष्ट्या आत्मनः द्वयोः जन्मनोः मध्यवर्तिनी यात्रा वर्तते।' अपरतः, तीर्थं नाम सद्गुणः उत सद्गुणानां समूहः (यथा सत्यम्, इन्द्रियनिग्रहः, सर्वभूतेषु दया, सहजता, क्षमादयः), यात्रा च तेषां सद्गुणानां प्राप्तेः प्रक्रिया उत प्रवासः वर्तते। इत्थं तीर्थयात्रा नाम सद्गुणविशेषान् अवाप्तुं व्यक्तेः प्रवासः भरद्वाजः सूचयति- 'तीर्थयात्रायाः आशयः पुण्यक्षेत्राणां भ्रमणस्य काचन भौतिकक्रियैव नास्ति, अपितु मानसिकं नैतिकम् अनुशासनम् अभिप्रैति।' मतमिदं पोषयितुं स पुनः विज्ञापयति-

'वस्तुतः, मानसिक-नैतिकानुशासनाद् ऋते, हिन्दुपरम्परायां तीर्थयात्रा अत्यल्पं महत्त्वम् आवहति'। अतः नेयं तीर्थयात्रा या केवलं यात्रायाः आमोदयात्रायाः इवैव अनुष्ठीयते। वस्तुतः तीर्थयात्रायाः नियमान् उपेक्ष्य उत स्वधर्मान् परित्यज्य विहितायाः यात्रा निरर्थिकैव भवति। वस्तुतः, आत्मशुद्ध्यै परमात्मसान्निध्यवृद्ध्यै च मनुजः तीर्थयात्रां समाचरेत्। हिंदूपरंपरानुसारं, विभिन्नानां हिंदूस्थलानां यात्रा अभीष्टा, किन्तु नेदम् अनिवार्यम् । अतः इयं यात्रा काम्यकर्मणा संबद्धा।

**तीर्थानां वर्गीकरणम्-**

ब्रह्मपुराणं चतुर्विधानि तीर्थानि प्रतिपादयति-

'चतुर्विधानि तीर्थानि स्वर्गे मर्त्ये रसातले।
दैवानि मुनिशार्दूल आसुराण्यारुषाणि च॥
मानुषाणि त्रिलोकेषु विख्यातानि सुरादिभिः।
ब्रह्मविष्णुशिवैर्देवैर्निर्मितं दैवमुच्यते।' ब्रह्मपुराणम् ७०.१६-१९न

दैवतीर्थाणि देवैः सृष्टानि, आसुरतीर्थानि असुरैः सह सम्बद्धानि, आर्षतीर्थाणि ऋषिमुनिभिः प्रतिष्ठापितानि। पुनश्च, मानुषाणि तीर्थानि भूपतिभिः सृष्टानि सन्ति। यथाहि, १. दैवतीर्थं - काशीविश्वेश्वरम्, २. आसुरतीर्थम् - गया, ३. आर्षतीर्थम् - प्रभासम्, ४. मानुषतीर्थम् - मनु, कुरु, अम्बरीषतीर्थम्।

पुण्यक्षेत्राणां तीर्थयात्रा विभिन्नधर्मैः तेषाम् अवलम्बिभ्यः निर्धारितेषु कर्तव्येषु किमपि महत्त्वपूर्णं स्थानं भजते। भारतस्य सांस्कृतिकपरम्परायाम् इयं काचन अतीव अद्भुता च सामाजिक-धार्मिकी घटना वर्तते। पवित्रस्थलेषु तीर्थयात्रा विभिन्नधर्मेषु तदनुयायिभ्यः निर्दिष्टायां कर्तव्यसूच्यां महत्त्वपूर्णं स्थानम् आधत्ते। इयं हि भारतीयसांस्कृतिकपरम्परायाः काचन अतीव रमणीया सामाजिकी धार्मिकी च घटना वर्तते। कस्मिंश्चिद् विशिष्टे प्रशस्तकाले तानि स्थलानि अतीव पवित्राणि भवन्तीति धर्मग्रन्थाः निर्दिशन्ति। तस्मिन् काले तीर्थयात्रायाः अतीव महिमा भवति। सुविख्यातो वैज्ञानिकः आईन्स्टीनवर्यः अवैक्षत यत् दिक्कालौ अभिन्नौ समानौ च स्तः। कालत्वेन यत्तत्त्वं सर्वैः अङ्गीक्रियते तत् किमपि अन्यद् न प्रत्युत अस्माकम् आकाशगङ्गायां स्थानविशेषे अवस्थितानां सौरमण्डलस्य अन्यैः ग्रहैः ताराभिश्च सह सूर्यं परितः अस्माकं पृथिव्याः कक्षायां विशिष्टे स्थाने अवस्थितिः वर्तते। इदं लक्ष्यते यत् न सर्वेषां स्थलानां समानाः विशेषताः भवन्ति। उक्तं महाभारते यत् यथा देहस्य कतिपयाः अवयवाः शुद्धाः

उच्यन्ते, तथैव पृथिव्यां केचन स्थलविशेषाः जलविशेषाश्च पवित्राः मन्यन्ते। पाश्चात्यो विद्वान् लारेन्सवर्यः अभिमनुते- 'भिन्नभिन्नेषु स्थलेषु भिन्ना चेतना, भिन्नः प्रभावः, भिन्नः स्पन्दः, भिन्नं रासायनिकं निश्वसनम्, भिन्नभिन्नैः नक्षत्रैः सह भिन्नभिन्ना ध्रुवीयता च वर्तते, परं स्थलविशेषस्य भावना तु महती वास्तविकता वर्तते।' ब्रह्मपुराणं निरूपयति यद् दैव-आसुर-आर्ष-मानुषाख्येषु तीर्थेषु पूर्वपूर्वं प्रशस्यते। तदनुसारं यथा मानवशरीरस्य कतिपयानि अङ्गानि (दक्षिणनेत्रम् उत दक्षिणकर्णम्) अन्येषाम् अपेक्षया अधिकानि पवित्राणि मन्यन्ते, तथैव अस्यां भुवि कतिपयानि क्षेत्राणि अतीव पुण्यानि मन्यन्ते।

'यथाशरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृताः।
तथा पृथिव्या उद्देशाः केचित् पुण्यतमाः स्मृताः॥
प्रभावाददद्भुतात् भूमेः सलिलस्य च तेजसा।
परिग्रहान्मुनीनां च तीर्थाणां पुण्यता स्मृता॥'

ऋग्वेदे आपः उद्दिश्य, सामान्यतः सर्वाः नदीः अथ च कतिपयाः विश्रुतनदीः उद्दिश्य श्रद्धायाः संकेतो लभ्यते, दैविकशक्तिभरितत्वात् पूजार्हाश्च ताः अभिमताः। 'ता आपो देवीरिह मामवन्तु' इति। तत्र काश्चन स्तुतयः देवरूपजलानि सम्बोधयन्ति-

'इदमापः प्रवहत यत्किं च दुरितं मयि।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम्॥' ऋ. १०.९.८

अतः तीर्थस्य आशयो वर्तते किमपि स्थानम् उत जलराशिः यः तत्तत्स्थानविशेषत्वात् प्राशस्त्यस्य संचयं जनयति। पौराणिकसाहित्यम् अनुशीलयामः चेत् प्रत्येकमपि पुण्यक्षेत्रं कतिपयैः विशिष्टैः धार्मिककृत्यैः संस्कारैश्च सह घनिष्ठं सम्बन्धम् आधत्ते।

**यात्राविधिः**

पुराणेषु निबन्धेषु च यात्रायाः विधौ अपि प्रतिपादनं लभ्यते। मत्स्यपुराणे (१०६/४-६) उक्तं यद् वलीवर्दम् आरुह्य प्रयागस्य तीर्थयात्रा न विधेया। तत्र वाहनेन तीर्थयात्रायाः सर्वथा निषेध एव उक्तः-

'ऐश्वर्यलाभमोहाद्वा गच्छेद्यानेन यो नरः।
निष्फलं तस्य तत्सर्वं तस्माद्यानं विवर्जयेत्॥'

तीर्थप्रकाशे पद्भ्यां सम्पादितायां यात्रायां सर्वाधिकं फलं प्रतिपादितम्-

'गोयाने गोवधः प्रोक्तः हययाने तु निष्फलम्।
नरयाने तु तदर्धं स्यात् पद्भ्यां चतुर्गुणम्॥
उपानद्भ्यां चतुर्थांशं गोयाने गोवधादिकम्।' (पद्मपुराणम्, ४/१९-२७)
वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्॥' (विष्णुपुराणम्, ३/१२/३८)

इति विष्णुपुराणीयवचनेन निष्प्रतिपक्षसदाशब्दस्वरसात् तीर्थ्यात्रायामपि उपानत्परिधानम् आवश्यकमिति (तीर्थचिन्तामणिः, पृ. ८-९)। विष्णुधर्मोत्तरपुराणं किमपि व्यावहारिकं मतं प्रस्तौति-

'तीर्थानुसरणं पद्भ्यां तपः परमिहोच्यते।
तदेव कृत्वा यानेन स्नानमात्रं फलं लभेत॥' (वि.ध.पु. ३/२७३/११-१२)

तीर्थक्षेत्रम् देवस्थानमिति आस्थाय प्राचीनस्मृतिकाराः तीर्थयात्रायां बलम् अददुः। विष्णुधर्मसूत्रं तीर्थयात्रां समेषां सामान्यधर्मत्वेन प्रतिपादयन्ति। तैत्तिरीयसंहितायां (६.३.१०) प्रतिपादितं यत् मनुजः त्रिभिः ऋणैः सह जन्म गृह्णाति तानि ऋणानि च तेन अवश्यं निर्वर्तनीयानि। तानि यथा- ऋषि-ऋणम्, पितृ-ऋणम्, देव-ऋणम् च। एषु त्रिषु ऋणेषु पितृ-ऋणं महत्त्वपूर्णं मन्यते। जन्म मृत्युश्च सतते अनन्ते च चक्रे सम्पृक्तौ स्तः। मृतकस्य अन्त्येष्टिः तस्य जीवने अतीव महत्त्वपूर्णं कर्तव्यं भवति। अतः मृतकसंस्काराश्रितेषु कृत्येषु अन्यतमं महत्त्वपूर्णं च श्राद्धं तीर्थक्षेत्रे अनुष्ठीयते। मृतकस्य पुनश्च परिवारस्य पितृणाम् निमित्तं तीर्थक्षेत्रे अनुष्ठितं श्राद्धमपि महत्त्वपूर्णं स्थानम् आवहति। तीर्थचिन्तामणौ उक्तं यत् मनुजः प्रयागे तपः चरेत्, गयायां पिण्डम् दद्यात्, कुरुक्षेत्रे दानम् आचरेत्, वाराणस्यां च स्वदेहं त्यजेत्। यथोक्तम्-

'प्रयागे वपनं कुर्याद् गयायां पिण्डपातनम्।
दानं दद्यात् कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत्॥ (नारदीय. उत्तर, ६३/१०३)

वैदिकपरम्परायां तीर्थानां महती प्रतिष्ठा। उत्तरवैदिककाले यात्रायाः महत्त्वं सम्यक् सिद्धं प्रतिष्ठितं चाभूत्। ऐतरेयब्राह्मणस्य (३३.५.५) वचनम्- **'यात्रायां स मधु विन्दते------'** तीर्थयात्रायाः स्तुतिरूपेण प्रायः गृह्यते। परं महाभारतं हि प्राचीनतमो ग्रन्थः यत्र तीर्थयात्रायाः शाब्दिकार्थानुगुणं सुप्रतिष्ठितापितधार्मिकानुष्ठानत्वेन वर्णयति। महाकाव्यं विमृशति यत् धार्मिकगुणानां कृते अयं कश्चन एकान्तवासः यत्र आध्यात्मिकजिज्ञासानां शान्त्या चिन्तनं मननं ध्यानञ्च विधीयते। तीर्थयात्राः अनेनोद्देशेन अनुकूलः यत् भव्यानि धार्मिकयज्ञानि सम्पादयितुं नार्हन्ति। इत्थं तीर्थ-यज्ञयोः साम्यं प्रतिपाद्य उक्तं यत् तीर्थयात्रया यज्ञानिष्ठानेन च अर्जितो गुणविशेषः उभयथा समान एव भवति। कूर्मपुराणे उक्तं यत् यः स्वधर्मान् परित्यज्य तीर्थानि सेवते स तीर्थयात्रायाः फलं न तु इहलोके न च परलोके विन्दते। पी.वी काणे अपि प्रतिपादयति यत् केवलं तीर्थयात्रया तीर्थस्नानेन च न किमपि सिध्यति, अतः हृदयपरिवर्तनं पापकर्मणः त्यागश्च परमावश्यकः। महाभारते उच्यते यत् पवित्रं मन एव वास्तविकं तीर्थम्। अपि च, पुराणेष्वपि उच्यते यत् गृहे स्थित्वा गृहस्थधर्मस्य अनवरतम् अनुपालनं वैदिकयज्ञादीनाञ्च अनवरतम् अनुष्ठानं तीर्थयात्रायाः अपेक्षया प्रशस्तं वर्तते।

महाकाव्यं स्थलविशेषे निर्दिष्टकृत्यसम्पादनात् तीर्थयात्रिणा प्राप्तव्यं फलमपि विवृणोति। तच्च मोक्षः, स्वर्गतिः , पापशुद्धिः, कामनापूर्तिः, सौन्दर्यप्रभृतिकं स्यात्। तथापि, तीर्थयात्रानुष्ठानं मुख्यतः जटिलयज्ञीयनियमान् सरलीकर्तुं प्रास्तूयत। इत्थं महाभारतं तीर्थयात्रायां वैदिकपरम्परायां च मिथः सद्भावं प्रादुरभावयत्। तत्पश्चात् तीर्थयात्रायाः सिद्धान्तः धर्मशास्त्रैः तीर्थपरकग्रन्थैः बहुशः पुनरावर्तितः।

## तीर्थयात्रायाः लाभाः

हिन्दूधर्मे यात्राया उपक्रमस्य अतीव महत्त्वं वर्तते। अत एव अस्मिन् धर्मे तीर्थयात्री, परिव्राजकः परिक्रमा चेति सदृशाः शब्दाः सन्ति। हिन्दूधर्मानुसारं व्यक्तेः जन्म मोक्षनिमित्तम् अभवत्। मोक्षस्य व्यावहारिकः अर्थो भवति आत्मज्ञानस्य परमज्ञानस्य वोपलब्धिः। धर्मस्य निखिला अपि उपक्रमाः, रीतय उत परंपराः इदमेव अभिप्रयन्ति। तेष्वेव अन्यतमः उपक्रमो वर्तते तीर्थयात्रायाः सम्पादनम्। प्रत्येकं हिन्दूजनस्य कृते तीर्थगमनं किमपि पुण्यं कर्म वरीवर्ति। हिन्दूधर्मो मनुते यत् मनुष्यजन्म लब्धं चेत् तर्हि विश्वस्य दर्शनम् अनिवार्यम्। तीर्थदर्शनञ्च तस्य दर्शनस्य कश्चन महत्त्वपूर्णः प्रधनभूतश्च उपायः। अत्र दर्शनस्य तात्पर्यं नाम एवंविधं दर्शनं यत् भवदीयस्य दर्शनस्य मध्ये विचाराणां मान्यतानां वा भित्तिः न स्यात्। तीर्थयात्राया वास्तविकं लक्ष्यं तु आत्मोद्धारः विद्यते। ऐहिकपारलौकककोभयविधानां भोगानां प्राप्तये अन्यान्यपि बहूनि साधनानि सन्ति। अतः प्रत्येकं मनुजाय अभीष्टमिदं यत् स भोगानां प्राप्तये तीर्थयात्रां नाचरेत्, प्रत्युत आत्मकल्याणाय तीर्थं उपगच्छेत्।

तीर्थयत्रा मानवं तस्य दैनिकजीवनस्य चर्यातः चिन्ताभ्यश्च विरञ्जयितुं सहायतां प्रयच्छति। एषा अवसरान् उपलम्भयति यत्र मनुजः प्रार्थनयाम्, ध्याने, नामजपे, भजने, अध्यात्मचिन्तने, शास्त्राध्ययने, आध्यात्मिकगुरूणां साधूनाञ्च प्रवचनानां श्रवणे च आत्मानं विनियोजयेत्। हिन्दुपरम्परायां चत्वारः आश्रमाः ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाख्याः प्रसिद्धाः। तीर्थयात्रायाः मुख्यकारणेषु मोक्षप्राप्तिः अन्यतमो हेतुर्वर्तते यः अनवरतजीवनमरणचक्रेभ्यो मुक्तिम् अभिप्रैति।

## तीर्थेषु अनुष्ठानानि

पुण्यक्षेत्राणां साधारणयात्रामात्रं न पर्याप्तम्। व्यक्तिः कस्यचित् स्थानविशेषस्य पुण्यम् अवाप्तुं कानिचन अनिष्ठानानि सम्पाद्येत। एतेषु, प्रायेण उपहाराणां प्रदानम्, उत स्नानम्, उत उपवासः, उत एकरात्रिवासः, उत विशिष्य यज्ञानुष्ठानमपि समाविष्टम्। स्थानविशेषेण सम्बद्धं महत्त्वं तत्र अनुष्ठितं कृत्यं च अनुरुध्य विविधविधानां पुण्यक्षेत्राणां

यात्रया विविधैः शुभैः धार्मिकानुष्ठानैश्च अर्जितं पुण्यं प्रतिक्षेत्रं भिद्यते। इत्थं, यदि स्नानेन क्वचिद् स्वर्गं लभ्यते, अन्यत्र पुष्पकविमानम् उत अप्सरसां सङ्गः उत अश्वमेधस्य अनुष्ठानसमं पुण्यं लभ्येत। पुनश्च, एकस्मिन् क्षेत्रे स्नानेन पुण्यविशेषः, अन्यत्र उपवासो महत्त्वपूर्णः स्यात्, अपरस्मिन् क्षेत्रे पितृणां श्राद्धम् अधिकं महत्त्वपूर्णम्। यद्यपि स्नानस्य निर्देशाः अधिकांशतः लक्ष्यन्ते। कानिचन अनुष्ठानानि तु तीर्थकेन्द्रितानि सन्ति। प्रयागे मुण्डनं गयायां च श्राद्धम् अतीव कल्यणकरं मन्यते। शास्त्रेषु उच्यते यत् प्रयागे तपः, गयायां पितृभ्यः पिण्डदानम्, कुरुक्षेत्रे उपहारः, वाराणस्याञ्च देहत्यागं कुर्यात्। इदमुच्यते यद् येन प्रयागे तपः आचरितं तर्हि तेन अन्येषु गयाकुरुक्षेत्रकाशीनामधेयेषु त्रिषु यात्रायाः का आवश्यकता? अत्रेदम् अवधेयं यत् सामान्यतः कुरुक्षेत्रम्, अवन्तिकाम्, विरजाम्, गयाम् च विहाय सर्वेष्वपि तीर्थेषु तपश्चर्या अनुशंस्यते। वाराणस्यां वसतिमात्रम् इयत् प्रशस्तं यत् पुराणानि उदीरयन्ति यत् वाराणसीं प्राप्य प्रस्तरेण स्वीयपादौ विमर्द्य आजीवनं काश्यामुपवसेत्। केचन जनाः वाराणस्याः पुण्यक्षेत्रस्य सीमानं न कदापि अतिक्राम्यन्तः समग्रं जीवनं तत्रैव यापयन्ति। उक्तं काशीखण्डे-

'कृत्वा कर्माण्येकानि कल्याणीतराणि च।
तानि क्षणात् समुत्क्षिप्य काशीसंस्थोऽमृतो भवेत्॥
महापापौघशमनीं पुण्योपचयकारिणीम्।
भुक्तिमुक्तिप्रदामन्ते को न काशीं सुधीः श्रयेत्॥'

उपक्रमात् सम्पूर्तिं यावत् तीर्थयात्रा अनुष्ठानैः अनुस्यूता वर्तते। काव्यानि पुराणानि तद्भाष्याणि च यात्रायाः बाह्यविशेषैः अनुष्ठितत्वात् पुण्यप्रमाणे भेदं प्रतिपादयन्ति। तत्र नग्नपादाभ्यां सम्पादितया यात्रया चतुर्गुणितं पुण्यमिति उद्घोषितम्। यात्रायाः प्रशस्तकालः, तीर्थयात्राय़ाः रीतिः, तीर्थेषु अनुपालनीयः आचारव्यवहारः इति सर्वं पुराणादिभिः सुष्ठु निर्दिष्टम्। धर्मशास्त्राणि विवृण्वन्ति यत् यज्ञानुष्ठानस्य उत विस्तृतानां मन्दिरसम्बद्धानाम् अनुष्ठानानाम् अपेक्षया तीर्थयात्रा सरलया सम्पादयितुं शक्या, यतोहि तत्र अल्पीयान् व्ययः सम्भाव्यते।

प्रत्येकस्मिन् धर्मे एकम् एकाधिकानि वा तीर्थस्थलानि विद्यन्ते यानि पुण्यानि पवित्राणि च मन्यन्ते। प्रत्येकस्मात् मनुजात् इयम् अपेक्ष्यते यत् स जीवनकाले न्यूनातिन्यूनं सकृत् उत बारम्बारं लौकिकानि अथ च अधिकमहत्त्वपूर्णानि पारलौकिकानि लक्ष्याणि प्राप्तुम् एतानि पुण्यक्षेत्राणि गच्छेयुः। एतासु नैकाः यात्राः एकाकिरूपेण विधीयन्ते, अपराश्च विशालतीर्थयात्राणां यथा कुम्भपर्वादीनाम् आकारं गृह्णन्ति। वस्तुतः, विश्वस्य समेषामपि मुख्यधर्माणां महत्त्वपूर्णं लोकप्रियं लक्षणं वर्तते तीर्थयात्रायाः अवधारणा। इत्थम्, तीर्थयात्रा वश्विकमानवीयघटना वर्तते। यद्यपि सर्वेषु

प्रमुखधर्मेषु तीर्थयात्रायाः अवधारणा वर्तते, परं तेषाम् अभिप्रायाः तत्सम्बद्धानि अनुष्ठानानि च विशदं भिद्यन्ते। यतः, तीर्थयात्रायाः अभिप्रायभेदः प्रतिधर्मं लक्ष्यते, एकस्मिन् धर्मेऽपि वैयक्तिकरूपेण भिद्यन्ते एते अभिप्रायाः।

**ऐक्यशक्तिः**

तीर्थयात्रा कस्यापि राष्ट्रस्य तन्निवासिनाञ्च कृते ऐक्यसम्पादिनी शक्तिरिति मन्यते। कानेवर्यः आह- यद्यपि भारतभूभागः नैकेषु साम्राज्येषु च विभक्तः आसीत्, भारतीयाः अपि भिन्नभिन्नानां संस्कृतीनाम् उपसंस्कृतीनाञ्च अवलम्बिनः आसन्, तथापि तीर्थयात्रिणः भारतस्य भारतीयसंस्कृतेश्चापि आधारभूतायाः मौलिक्याश्च एकतायाः विचारं पोषयितुं सर्वदा प्रावर्तन्त। वाराणसी स्यात् रामेश्वरं वा औत्तरीयाः स्युः दाक्षिणात्याः वा सर्वैरपि हिन्दुभिः वाराणस्याः रामेश्वरस्य च पावनत्वं समानदृष्ट्या स्वीकृतम्। यद्यपि हिन्दुसमाजः बहुविधजातिषु बद्धः अन्यासु भाषाक्षेत्रादिसंकीर्णतादिषु पाशग्रस्तः आसीत्, किन्तु तीर्थयात्राः तान् सर्वान् अपि नदीनां पुण्योदकक्षेत्रेषु स्थलेषु च एकस्मिन् स्थाने उपावेशयन्। इरिना ग्लुश्कोवा महोदया लिखति, " हिंदूधर्मे तीर्थयात्रा एकीकरणस्य सम्पादने मुख्या शक्तिः। एकम् एतादृशम् उपमहाद्वीपम् यत्र तु भाषिकदृष्ट्या नैव च जातिदृष्ट्या एकरूपतामादधात्, राजनैतिकार्थेष्वपि सम्भवतः कदाचिदेव ताथाभूतमासीत्, तथा च प्रायेण तत्त्वतः निर्णीतः पदानुक्रमोऽपि नासीत्, तत्र एकतायाः भावना सुदूरवर्तिनाम् अभयारण्याणां यात्रया, एकदेवस्य समानदेवालयस्य च उपासनायां विविधधर्मेभ्यः जनानां मेलनेन दृढं प्रोत्साहितं स्यात्, विभिन्नधर्मावलम्बिनः जनान् श्रद्धया संयोज्य, सहस्रक्रोशदूरस्थानां प्रसिद्धानां नदीनां मन्दिराणाञ्च निकटे निर्गच्छतो धर्मपरायणान् जनान् दृष्ट्वा, सहस्रशः कोशदूरवर्तिनां मन्दिराणां प्राशस्त्यं श्रुत्वा, येषां माहात्म्ये, ये खलु गृहे एव अतिष्ठन् तेऽपि सहधर्मिणः इति भावनां अनुभवितुं शक्नुवन्ति। ” एम. एन. श्रीनिवासः प्रतिपादयति यत् तीर्थयात्रा भारतस्य एकताम् एकसत्तात्वेन प्रमाणयति, एवंविधा एकता या राष्ट्रियैक्याय पारम्परिकमाधारं प्रददाति, जातिक्षेत्रादिसम्बन्धांश्च परिवेष्टयति। समेकित'भारतमातुः' विचारं प्रोन्नेतुं अखिलभारतीयतीर्थानां भूमिकायां जवाहरलाल नेहरूमहोदयस्य व्याख्यानानि भूयोभूयः उद्ध्रियन्ते।

**उपसंहारः**

अटनं मुख्यतः भौगोलिकक्षेत्रे बाह्या यात्रा, या मुख्यरूपेण आमोदस्य अन्वेषणे उत जिज्ञासावशात् भवति। पारंपरिकदृशा तीर्थयात्रा बाह्याकाशे आंतरिकयात्रायाः अभिव्यक्तिः, यस्यां विश्वमयता विश्वोत्तीर्णता च एकीभूय जटिलां घटनां रचयतः। सामान्यतया, मनुष्यः बाह्यम् आन्तरिकं चोभयविधां यात्राम् अपेक्षते। भारतवर्षे तीर्थयात्रायाः सशक्ता प्राचीना च परंपरा वर्तते। इयं च परम्परा पुराकाले प्रतीकात्मक शुदध्नुष्ठानत्वेन जलनिकायेषु पुण्योदकस्नानस्य समवेशं सूचयति। आस्था हि तीर्थयात्रया सम्बद्धानाम् इच्छानां, प्रतिज्ञानां कृत्यानां च केन्द्रे अवस्थिता। तीर्थयात्रा एतादृशी प्रक्रिया वर्तते यद्द्वारा जनाः तदासन्नवर्ति ब्रह्मांडं ज्ञातुं प्रयतन्ते।

विश्वस्मिन् विश्वे तीर्थयात्रा अनवरतं वृद्धिं याति। स्थलमार्गः स्यात् नदीमार्गो वा, उभयविधाः महत्त्वपूर्णाः मार्गाः तीर्थक्षेत्राणि स्पृष्ट्वा अग्रेगताः। इत्थं इमानि तीर्थक्षेत्राणि व्यापारस्य वाणिज्यस्य च महत्त्वपूर्णानि केन्द्राणि अभूवन्। साम्प्रतं वायुयात्रायाः आधुनिकपरिवहनस्य प्रकारान्तराणां च विकासत्वात् अगणितसंख्यायां तीर्थयात्रिणः तीर्थेषु गच्छन्ति। इत्थं, तीर्थयात्रा निखिले विश्वे धर्माचरणस्य केन्द्रीयां भूमिकां निरन्तरं निर्वहति। वस्तुतः, तीर्थयात्रा तीर्थक्षेत्रस्य आमोदयात्रा नास्ति प्रत्युत इयं काचन तपस्या। तीर्थे यात्राया मध्ये चापि करुणा, अहिंसा, सत्यं, शुचिता, सदाचारः, ब्रह्मचर्यञ्चेत्येषां नियमा अनुसरणीयाः। तीर्थयात्रिणां कृते तस्य क्षेत्रस्य एकं तृणमपि अतीव पवित्रं वर्तते। परन्तु खेदस्य विषयः यत् साम्प्रतं नैके पर्यटकाः इमान् नियमान् उपेक्षमाणाः गभीरं पारिस्थितिकम् असन्तुलनं जनयन्ति। विडम्बनैव इयं यत् आत्मनः शिक्षितान् मन्यमानेषु जनेष्वेव प्रवृत्तिरियं भूयसी संलक्ष्यते। तदपेक्षया ग्रामीणजनाः पुण्यक्षेत्राणां पावनत्वम् अभिलक्ष्य अधिकं जागरुकाः सावधानाश्च वर्तन्ते । अस्माकं मनीषिणः पुराकालतः एव समस्यामिमाम् दृष्टौ निधाय तीर्थक्षेत्रे यात्रिभ्यः को धर्मः कश्च अधर्म इति कांश्चन सिद्धान्तान् निर्धारितवन्तः। स खलु धर्मः यो हि सर्वाणि भूतानि धारयति। किं पापं किञ्च पुण्यमित्यस्य विवेकम् आश्रित्य लोकः धर्मम् आचरितुं प्रेर्यते स्म । धर्मशस्त्रीयग्रन्थेषु कर्तव्याकर्तव्यविषयकाः विधिनिषेधाः आचार्यैः सविस्तरं समुपदिष्टाः, ये च अतीव प्रभावयुताः आसन्। अस्माकं महदिदं दायित्वं यत् पुण्यस्थानानि स्वच्छानि जलनिकायाश्च प्रदूषणमुक्ताः स्युः। भारते तीर्थक्षेत्राणाम् अभयारण्यादीनाञ्च संख्या इयदधिका, तीर्थयात्रायाः अभ्यासश्च इयान् सर्वव्यापी यत् सम्पूर्णमपि भारतं विशालपुण्यभूभागत्वेन स्वीकर्तुं शक्यते। अस्माभिः सर्वदा इदम् अवधेयं यत् भारतस्य अस्यां पुण्यभूमौ देवा अपि वसतिं विधातुं लालसां प्रकटयन्ति ।

**सन्दर्भाः**


1. नारायण भक्त(2010), भारत के पवित्र तीर्थ, ग्रन्थ अकादमी, नई दिल्ली।
2. प्राणेश, जयन्ती (2004), हमारे पूज्य तीर्थ, नई दिल्ली, मनोज पब्लिकेशन्स।
3. सिन्हा, पवन कुमार (1992), उत्तर प्रदेश की तीर्थ नगरियाँ, दिल्ली आत्माराम एन्ड सन्स।
4. मनुस्मृतिः (सम्पादकः केशव किशोर कश्यप, 2015), वाराणसी, चौखम्बा कृष्णदास अकादमी।
5. याज्ञवल्क्यस्मृतिः (सम्पादकः आर.के.पण्डा, 2011), दिल्ली, भारतीय कला प्रकाशन।
6. श्रीवाल्मीकिरामायणम् (सम्पादकः कालूरि हनुमन्तरावः, 2011), सिकन्दाबाद, सैनिकपुरी।
7. महाभारतम् (सम्पादकः परमहंसस्वामिजगदीश्वरानन्द सरस्वती, 1998), दिल्ली, विजयकुमार गोविन्दराम हासानन्द।
8. श्रीमद्द्वैपायनमुनिप्रणीतं मत्स्यपुराणम्, (आनन्दाश्रमपण्डितैः संशोधितम्, 1981), पुण्याख्यपत्तनम्, आनन्दाश्रमः।
9. श्रीस्कन्दमहापुराणम् (सम्पादकः श्रीकृष्णदासः, 1986), दिल्ली, नाग पब्लिशर्स।